# Kundika Upanishad

# કુણ્ડિકોપનિષત્

## Document Information

Text title : Kundika Upanishad

File name : kundika.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)

Proofread by : Sunder Hattangadi (sunderh at hotmail.com)

Description-comments : 74 / 108; Sama Veda - Sanyasa upanishad

Latest update : October 16, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 16, 2019

*sanskritdocuments.org*

# કુણ્ડિકોપનિષત્

કુણ્ડિકોપનિષત્ખ્યાતપરિવ્રાજકસંતતિઃ ।
યત્ર વિશ્રાન્તિમગમત્તદ્રામપદમાશ્રયે ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં
બ્રહ્મોપનિષદં માહં બ્રહ્મ નિરાકુર્યાં
મા મા બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં
મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ
સન્તુ તે મયિ સન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ
બ્રહ્મચર્યાશ્રમે ક્ષીણે ગુરુશુશ્રૂષણે રતઃ ।
વેદાનધીત્યાનુજ્ઞાત ઉચ્યતે ગુરુણાશ્રમી ॥ ૧॥

દારમાહૃત્ય સદૃશમગ્નિમાધાય શક્તિતઃ ।
બ્રાહ્મીમિષ્ટિં યજેત્તાસામહોરાત્રેણ નિર્વપેત્ ॥ ૨॥

સંવિભજ્ય સુતાનર્થે ગ્રામ્યકામાન્વિસૃજ્ય ચ ।
સંચરન્વનમાર્ગેણ શુચૌ દેશે પરિભ્રમન્ ॥ ૩॥

વાયુભક્ષોઽમ્બુભક્ષો વા વિહિતૈઃ કન્દમૂલકૈઃ ।
સ્વશરીરે સમાપ્યાથ પૃથિવ્યાં નાશ્રુ પાતયેત્ ॥ ૪॥

સહ તેનૈવ પુરુષઃ કથં સંન્યસ્ત ઉચ્યતે ।
સનામધેયો યસ્મિંસ્તુ કથં સંન્યસ્ત ઉચ્યતે ॥ ૫॥

તસ્માત્ફલવિશુદ્ધાઙ્ગી સંન્યાસં સંહિતાત્મનામ્ ।
અગ્નિવર્ણં વિનિષ્ક્રમ્ય વાનપ્રસ્થં પ્રપદ્યતે ॥ ૬॥

લોકવદ્ભાર્યયાસક્તો વનં ગચ્છતિ સંયતઃ ।
સંત્યક્ત્વા સંસૃતિસુખમનુતિષ્ઠતિ કિં મુધા ॥ ૭॥

કિંવા દુઃખમનુસ્મૃત્ય ભોગાંસ્ત્યજતિ ચોચ્છ્રિતાન્ ।
ગર્ભવાસભયાદ્ભીતઃ શીતોષ્ણાભ્યાં તથૈવ ચ ॥ ૮॥

ગુહ્યં પ્રવેષ્ટુમિચ્છામિ પરં પદમનામયમિતિ ।
સંન્યસ્યાગ્નિમપુનરાવર્તનં યન્મૃત્યુર્જાયમાવહમિતિ ॥

અથાધ્યાત્મમન્ત્રાઞ્જપેત્ । દીક્ષામુપેયાત્કાષાયવાસાઃ ।
કક્ષોપસ્થલોમાનિ વર્જયેત્ । ઊર્ધ્વબાહુર્વિમુક્તમાર્ગો ભવતિ ।
અનિકેતશ્ચરેભિક્ષાશી । નિદિધ્યાસનં દધ્યાત્ । પવિત્રં
ધારયેજ્જન્તુસંરક્ષણાર્થમ્ । તદપિ શ્લોકા ભવન્તિ ।
કુણ્ડિકાં ચમકં શિક્યં ત્રિવિષ્ટપમુપાનહૌ ।
શીતોપઘાતિનીં કન્થાં કૌપીનાચ્છાદનં તથા ॥ ૯॥

પવિત્રં સ્નાનશાટીં ચ ઉત્તરાસઙ્ગમેવ ચ ।
અતોઽતિરિક્તં યત્કિંચિત્સર્વં તદ્વર્જયેદ્યતિઃ ॥ ૧૦॥

નદીપુલિનશાયી સ્યાદ્દેવાગારેષુ બાહ્યતઃ ।
નાત્યર્થં સુખદુઃખાભ્યાં શરીરમુપતાપયેત્ ॥ ૧૧॥

સ્નાનં પાનં તથા શૌચમદ્ભિઃ પૂતાભિરાચિરેત્ ।
સ્તૂયમાનો ન તુષ્યેત નિન્દિતો ન શપેત્પરાન્ ॥ ૧૨॥

ભિક્ષાદિવૈદલં પાત્રં સ્નાનદ્રવ્યમવારિતમ્ ।
એવં વૃત્તિમુપાસીનો યતેન્દ્રિયો જપેત્સદા ॥ ૧૩॥

વિશ્વાયમનુસંયોગં મનસા ભાવયેત્સુધીઃ ।
આકાશાદ્વાયુર્વાયોર્જ્યોતિર્જ્યોતિષ આપોઽદ્ભ્યઃ પૃથિવી ।
એષાં ભૂતાનાં બ્રહ્મ પ્રપદ્યે । અજરમમરમક્ષરમવ્યયં પ્રપદ્યે ।
મય્યખણ્ડસુખાંભોધૌ બહુધા વિશ્વવીચયઃ ।
ઉત્પદ્યન્તે વિલીયન્તે માયામારુતવિભ્રમાત્ ॥ ૧૪॥

ન મે દેહેન સંબન્ધો મેઘેનેવ વિહાયસઃ ।
અતઃ કુતો મે તદ્ધર્મા જાગ્રત્સ્વપ્નસુષુપ્તિષુ ॥ ૧૫॥

આકાશવત્કલ્પવિદૂરગોહ-
માદિત્યવદ્ભાસ્યવિલક્ષણોઽહમ્ ।
અહાર્યવન્નિત્યવિનિશ્ચલોઽહ-

મમ્ભોધિવત્પારવિવર્જિતોઽહમ્ ॥ ૧૬॥

નારાયણોઽહં નરકાન્તકોઽહં
પુરાન્તકોઽહં પુરુષોઽહમીશઃ ।
અખણ્ડબોધોઽહમશેષસાક્ષી
નિરીશ્વરોઽહં નિરહં ચ નિર્મમઃ ॥ ૧૭॥

તદભ્યાસેન પ્રાણાપાનૌ સંયમ્ય તત્ર શ્લોકા ભવન્તિ ॥

વૃષણાપાનયોર્મધ્યે પાણી આસ્થાય સંશ્રયેત્ ।
સંદશ્ય શનકૈર્જિહ્વાં યવમાત્રે વિનિર્ગતામ્ ॥ ૧૮॥

માષમાત્રાં તથા દૃષ્ટિં શ્રોત્રે સ્થાપ્ય તથા ભુવિ ।
શ્રવણે નાસિકે ગન્ધા યતઃ સ્વં ન ચ સંશ્રયેત્ ॥ ૧૯॥

અથ શૈવપદં યત્ર તદ્બ્રહ્મ બ્રહ્મ તત્પરમ્ ।
તદભ્યાસેન લભ્યેત પૂર્વજન્માર્જિતાત્મનામ્ ॥ ૨૦॥

સંભૂતૈર્વાયુસંશ્રાવૈર્હૃદયં તપ ઉચ્યતે ।
ઊર્ધ્વં પ્રપદ્યતે દેહાદ્ભિત્ત્વા મૂર્ધાનમવ્યયમ્ ॥ ૨૧॥

સ્વદેહસ્ય તુ મૂર્ધાનં યે પ્રાપ્ય પરમાં ગતિમ્ ।
ભૂયસ્તે ન નિવર્તન્તે પરાવરવિદો જનાઃ ॥ ૨૨॥

ન સાક્ષિણં સાક્ષ્યધર્માઃ સંસ્પૃશન્તિ વિલક્ષણમ્ ।
અવિકારમુદાસીનં ગૃહધર્માઃ પ્રદીપવત્ ॥ ૨૩॥

જલે વાપિ સ્થલે વાપિ લુઠત્વેષ જડાત્મકઃ ।
નાહં વિલિપ્યે તદ્ધર્મૈર્ઘટધર્મૈર્નભો યથા ॥ ૨૪॥

નિષ્ક્રિયોઽસ્મ્યવિકારોઽસ્મિ નિષ્કલોઽસ્મિ નિરાકૃતિઃ ।
નિર્વિકલ્પોઽસ્મિ નિત્યોઽસ્મિ નિરાલમ્બોઽસ્મિ નિર્દ્વયઃ ॥ ૨૫॥

સર્વાત્મકોઽહં સર્વોઽહં સર્વાતીતોઽહમદ્વયઃ ।
કેવલાખણ્ડબોધોઽહં સ્વાનન્દોઽહં નિરન્તરઃ ॥ ૨૬॥

સ્વમેવ સર્વતઃ પશ્યન્મન્યમાનઃ સ્વમદ્વયમ્ ।
સ્વાનન્દમનુભુઞ્જાનો નિર્વિકલ્પો ભવામ્યહમ્ ॥ ૨૭॥

ગચ્છંસ્તિષ્ઠન્નુપવિશઞ્છયાનો વાન્યથાપિ વા ।
યથેચ્છયા વસેદ્વિદ્વાનાત્મારામઃ સદા મુનિઃ ॥ ૨૮॥ ઇત્યુપનિષત્ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં
બ્રહ્મોપનિષદં માહં બ્રહ્મ નિરાકુર્યાં
મા મા બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં
મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ
સન્તુ તે મયિ સન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ તત્સત્ ॥

ઇતિ કુણ્ડિકોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

*Kundika Upanishad*
pdf was typeset on October 16, 2019

Please send corrections to *sanskrit@cheerful.com*